कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 775 विषय धर्मशास्त्र

नाव. शिव प्रतिष्ठापद्धति (mss)

लेखक/लिपीकार –

पृष्ठ 18 काळ – पूर्ण/अपूर्ण

॥ श्रीगणेशाय नमः ॥ शिवप्रतिष्ठापद्धतिः ॥ आचम्य प्राणानायम्य ॥ मम
एतज्जन्मनि कायिकादिसकलदुरितक्षयार्थं करिष्यमाणसपरिवारशिवमू
र्तिप्रतिष्ठाकर्मण्यधिकारसिध्यर्थं मे कं प्राजापत्यप्रायश्चित्तं प्रत्याम्नाय
त्वेन विहितायाः गोः निष्क्रयीभूतं यथाशक्ति द्रव्यं यथानामगोत्राय ब्राह्मणा
य दातुमहमुत्सृज्ये ॥ तेन श्रीपापापहा महाविष्णुः प्रीयतां ॥ पुनराचम्य ॥ मम
मम भ्रूणहत्यामहापापोपपातकादिसकलपापक्षयकोटिगुणसर्वयज्ञतपोदा
नतीर्थवेदपुराणादिपुण्यफलप्राप्तिपूर्वकमेकविंशतिसंख्याकमातृपितृकुपत्नी
कुलत्रयनरकोत्तारणपूर्वकानेककल्पव्यापिस्वर्गलोकहर्षपरार्धद्वयकालम
हरूपः प्रभृति लोकांगना सहितभोगपूर्वकोत्तरवर्षकोटिसहस्रावधि

कर्मणा मधुपर्कदृष्टारं सर्वकर्मविदुत्तमं ॥ कर्मेण वेदतत्त्वज्ञं यज्ञेस्मिन् त्वामहं वृणे ॥ धारिसितस्य यज्ञस्य

न्नरुद्रलोकमहत्वादुत्तरकालिकमहापार्थिवजन्मभूरत्ववत्पुत्रस्य च आरोग्यविपु
लभोगपूर्वकं श्रेयोत्तरकालिकयोगाद्युत्तरलोमोक्षप्राप्तिकामः अस्मिंनूसपरिवा
रशिवमूर्तौ देवकलान्यासांनिध्यार्थं श्रीपरमेश्वरप्रीत्यर्थं च सपरिवारशिवप्रतिष्ठां
करिष्ये ॥ तदंगभूतं स्वस्ति पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धमाचार्यादि ऋत्विग्व
रणं च करिष्ये ॥ तत्रादौ निर्विघ्नतासिध्यर्थं महागणपतिपूजनं करिष्ये ॥ आचार्यप्रा
र्थना ॥ आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः ॥ तथा त्वं मम यज्ञेस्मिन्नाचार्यो भव
सुव्रत ॥ यथा चतुर्मुखो ब्रह्मा सर्वदेवनमस्कृतः तथा त्वं मम यज्ञेस्मिन् ब्रह्मा भव
द्विजोत्तम ॥ भगवन्सर्वधर्मज्ञ सर्वधर्मभृतां वर वितते मम यज्ञेस्मिन् सदस्यो भव
वसुव्रत ॥ अस्य यागस्य निष्पत्तौ भवंतो भ्यर्चिता मया ॥ सावधानाः प्रकुर्वंतु

हनु[illegible]प्रतिष्ठां च यत्

१ हनुमत्प्रतिष्ठा

स्वं कर्म यथोदितं ॥ यस्मात्विजौ बुधा कल्पयंतु स्वचैतसो यज्ञमिमं वहंतो ॥ योऽत्र
चानो ब्राह्मणा युक्त आसीत्कश्चित्तच्च यजमानस्य संवित् ॥ ततो दंपत्योर्वारुणी दी
क्षा ॥ दंपत्योरुत्तरीययोस्सफलाक्षतग्रंथिबंधः ॥ देवस्यत्वेत्यादिमंत्रैस्तयोर
भिषेकः ॥ यदाबध्नन्दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमानाः ॥ तन्म आब
ध्नामि शतशारदायायुष्मान्जरदष्टिर्यथासत् ॥ इति मंत्रेण यजमानकरे कुंकु
माक्तसूत्रबंधनं । स्वस्ति न इति तिलककरणं । दधिक्राव्णा इति दधिवंदनं । कांडा
त्कांडादिति दूर्वाभिर्मार्जनं ॥ अक्षन्नमीमदंतेति अक्षतवंदनं तत औषधीर्वा अक्षता
न्गृहीत्वा ॥ करोतु स्वस्ति ते ब्रह्मा स्वस्ति चापि द्विजातयः ॥ सरीसृपाश्च ये श्रेष्ठास्तेभ्यस्ते
स्ते स्वस्ति सर्वदा ॥ ययातिर्नहुषश्चैव धुंधुमारो भगीरथः ॥ तुभ्यं राजर्षयः सर्वे स्वस्ति

कुर्यात् ३

कुर्वंतु निस्सशः । स्वस्ति तेस्तु द्विपादेभ्यश्चतुष्पादेभ्य एव च ॥ स्वस्त्यस्त्वपादकेभ्य
श्च निसंतव महामखे ॥ इति पठित्वा । यजमानहस्ते अक्षतान् दत्वा वदेत् । वंदि
स्थितोसि नियमेन स्थातव्यं ॥ तत आचार्यः भूतोत्सारणादि । यदत्र संस्थितं भूतं स्थान
माश्रित्य सर्वदा । स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु । अपक्रामंतु भूतानि पि
शाचाः सर्वतो दिशं । सर्वेषामविरोधेन ब्रह्मकर्म समारभे ॥ पंचगव्यं संपाद्य । शु
चीवो हव्येत्यादिमंत्रैः पंचगव्येन यज्ञभूमिं प्रोक्ष्य आपोहिष्ठेति शुद्धोदकेन । स्वस्त्य
यनं तार्क्ष्यं इति लाजान् अक्षतान् वा विकिरेत् ॥ देवा आयांतु यातुधाना अपयां
तु विष्णो देवयजनं रक्षस्वेति भूमौ प्रादेशं कुर्यात् ॥ ततो मधुपर्कः ॥ ततः अंकुराधि
वासनं ॥ आचार्यो मूर्तिधरैर्यजमानवरत्विक्सुवासिनीसुहृद्युतः अभ्यादि

वि

२

तदुपरि देवं स्थाप्य ४

यानैः सह पूजाद्रव्याणि गृहीत्वा गीतवाद्यमंगलघोषसुवासिनीहस्तस्थितक
लशान्यतः स्नापमूर्तिसहितः जलाशयं गच्छेत् ॥ तत आचार्यः तत्र वेदिं कृत्वा तदु
परि देवं स्थाप्य स्योना पृथिवीत्यृग्भिः शोधयित्वा । पंचगव्यमंत्रान् पठन् शोध
जलांतिकं तोरणपुष्पमालादिभिः शोभितं कुर्यात् ॥ ततः पीठोपरि पद्मं कृत्वा तत्पी
ठं जलाशये स्थापयेत् । अथ पीठस्याधोभागे आधारशक्त्यै नमः इति संपूज्य प्रार्थ
येत् ॥ यदाधारे जगत्सर्वं सप्तावरणसंयुतं । लोकालोकसमाकीर्णं सप्तार्णवज
लोद्भवं । सर्वबीजसमायुक्तं प्राणशक्तिसमन्वितं । सा त्वं धत्स्व महापीठं यत्र संस्था
प्यते हरिः इति प्रार्थ्य ॥ आधारशक्त्यै नमः इति बलिं दद्यात् । ततः पीठस्य परितः
प्रागादिदिक्षु अष्टदिग्गजान् आवाह्य पूजयेत् । ऐरावताय नमः १ पुंडरीकाय २
वामनाय ३ कुमुदाय ४ अंजनाय ५ पुष्पदंताय ६ सार्वभौमाय ७ सुप्रतीकाय ८

हनुमन्मूर्तेर्ध्व ३

ततः पीठमध्ये वीरभद्रादिद्वारपालान् वीरभद्राय नमः १ नंदिने २ महाकालाय ३ गणे
शाय ४ वृषभाय ५ भृंगिणे ६ स्कंदाय ७ उमायै ८ चंडीश्वराय ९ इति संपूज्य ब
लिं दद्यात् ॥ ततो यजमानः आचम्य अस्याः सपरिवारशिवमूर्तेः गर्भाधानादिसंस्का
रत्रयमहं करिष्ये ॥ पुष्पाक्षतान् गृहीत्वा ॥ या आपो मातृभूता वै जगदुत्पत्तिपोषणे ॥ त
स्तु तो गर्भसंस्कारो मूर्तौ समुपतिष्ठतां ॥ उदीर्ष्वातः पतिवती ० इति गर्भाधानं पुष्पाक्ष
तान् सुक्षिपेत् ॥ पुनर्गृहीत्वा ओषधीः प्रतिमोदध्वं ० ॥ हिरण्यगर्भः समवर्तताग्रे ० सं भू
तं० यासां गर्भे हि संजाता विरिंच्याद्या महाधिपाः महापुंसवना नाम सस्याः क्रिया पुंसव
नान्विताः ॥ एतेन पुंसवनाख्येन कर्मणा संस्करोमि ॥ पुष्पादि जले क्षिपेत् ॥ पुनरादा
य ॥ यत्ते सुसीमे हृदये ० अनेनानवलोभनकर्मणा संस्करोमि पुष्पादि जले क्षिपेत् ॥
एतत्कर्मणां हवनप्रत्याम्नायेन ब्राह्मणाय किंचिद्धान्यं दातुमहमुत्सृजे ॥ ३

तत औदुंबरस्तबकं कुशांतरुणैः त्रेण्या शलल्या अलके त्रिरेखां कुर्यात् ॥ समस्त
व्याहृतिमंत्रेण सोम एव नो राजेति अथ प्रार्थना ॥ चिच्छक्तया बीजवहा वहावहारूपा शि
मलिनी गर्भभरेण युक्ता ॥ सेयं भवद्भ्यो विदधातु कामान् सीमंतसंस्कारितशीर
केशा ॥ अस्मिन् सदाशिवक्षेत्रे शिलाभूते विधानतः ॥ कृतः सीमंतसंस्कारस्तेन तु
ष्यतु मे हरः ॥ असुमेनरू समुद्रज्येष्ठा ४ सर्वेषामेव बीजानां कारणानि जलानि तु
जीवनं सर्वजंतूनां तेषु संस्थाप्यतो हरः ॥ ततो देवप्रार्थना ॥ निषिक्त यदि क्रममागी
तं कुत्सिताक्षरसंभवं ॥ लक्षणादिविनिर्मुक्तं विधिहीनं समाहृतं ॥ सर्वसिद्धिप्रदं
शुभ्रं दिव्यं भव्यं च सर्वदा ॥ त्वदधिष्ठानसंयोग्यं त्वत्प्रसादात् सुरेश्वर ॥ पुरुषसूक्ता
दिजपन् पूजां कुर्यात् एवं अधिवासनं कृत्वा जलयात्रां कुर्यात् ॥ आचम्य शिवम

ति ष्ठांगभूतां जलयात्रां करिष्ये ॥ तीरं प्रक्षाल्य गोमयेन चतुरस्रमुपलिप्य यवैस्तंडुलै
र्वा स्वस्तिकं अष्टदलं पद्मं वा कृत्वा बलिश्चापर्वतानामिति भूमिं ध्यात्वा मंडलस्य प्रा
गादिदिक्षु मध्ये च तंडुलपुंजान् कृत्वा चतुर्दिक्षु चतुरः मध्ये एकमेवं पंच कलशान्
स्थापयेत् मूले ब्रह्माणं मध्ये विष्णुं कंठे रुद्रं चावाहयेत् । इमंमे गंगे इति जलेनापूर्य गंधा
दिना पूजयेत् । तच्च वरुणं संपूज्य ॥ प्रार्थयेत् ए स्वेहियादोगण वारिधीनां गणेन देवैर
सहाप्सरोभिः । विद्याधरेंद्रामरगीयमान पाहि त्वमस्मान् भवन्नमस्ते ॥ ततः कल
शाग्नेय्यां स्वस्तिकादौ कलसप्ताक्षतपुंजेषु मातृस्थापनं ॥ मत्स्यै नमः १ कूर्म्यै २ वा
राह्यै ३ दर्दुर्यै ४ मकर्यै ५ जलूकायै ६ तंतुकायै ७ ॥ तत्पुरतः पुंजेषु ॥ कुमार्यै १
धनदायै २ नंदायै ३ विमलायै ४ मंगलायै ५ बलायै ६ पद्मायै ७ तत्पुरतः पुं
जेषु कूर्म्यै १ लक्ष्म्यै २ महामायै ३ पानदेव्यै ४ वारुण्यै ५ निर्मलायै ६ गोधायै ७ ॥

ततो मंडलाद्बहिः अष्टदिक्षु दिक्पालान् आवाह्य पूजयेत् ॥ ततः स्थापितदेवतानां
जलप्रक्षेपः । ततः जले चांद्रायणाघृताहुतीर्दद्यात् ॥ अद्भ्यः स्वाहा अद्भ्य इदं ॥ १ वार्भ्यः २
उदकाय ३ तिष्ठंतीभ्यः ४ स्रवंतीभ्यः ५ स्यंदमानाभ्यः ६ कूप्याभ्यः ७ सूद्याभ्यः ८ धार्या
भ्यः ९ अर्णवाय १० समुद्राय ११ सरिराय १२ ॥ ततो वरुणप्रार्थना । प्रतीचीशनमस्तेस्तु
सर्वाघविनिषूदन । पवित्रं कुरु मे देव सर्वकार्येषु सर्वदा ॥ अथ देवप्रबोधनं ॥ ॐ नमो भग
वते सकाशिवाय सकलतत्त्वात्मकाय सकलतत्त्वविदूराय सकललोकैककर्त्रे सकललो
कैकभर्त्रे सकललोकैकहर्त्रे सकललोकैकगुरवे सकललोकैकसाक्षिणे सकलनिगमगु
ह्याय सकलवरप्रदाय सकललोकैकशंकराय शशांकशेखराय शाश्वतनिजाभासा
य निर्मलभासाय निरुपमाय निराधाराय निर्लेपाय निर्द्वंद्वाय निरूपमविभवाय नित्यशु

थपरिपूर्णसन्निधानं गृह्याय परमशांतप्रकाशात्मनेरूपाय जयजय महा
रुद्र महारौद्र भद्रावतार महाभैरव कालभैरव कल्पांतभैरव कपालमाला
धर खट्वांग खड्ग चर्म पाशांकुश डमरु शूल चाप बाण गदा शक्ति भिंदिपाल
तोमर मुसल मुद्गर भुशुंडि प्रास परिघ शाल धीशास्त्र चंद्रचंद्रायुध भीषणकर
सहस्रमुखदंष्ट्राक विकटाट्टहासविस्फारितब्रह्मांडमंडल नागेंद्रकुंडल
नागेंद्रहार नागेंद्रवलय नागेंद्रचर्मधर मृत्युंजय त्र्यंबक त्रिपुरांतक विश्वेश्वरवि
रूपाक्ष वृषवाहन विषभूषण विश्वतोमुख सर्वतो रक्ष रक्ष मां नमस्ते नमस्ते।
इतिस्तुत्वा जलाद्बहिर्देवे आनीयमाने कद्रुद्राय ऋक् त्र्यंबकं ऋक् पठित्वा ततः ती
रे स्वस्तिकं कृत्वा तत्र देवं स्थापयित्वा जलाज्ज्वालमिति भावयेत्॥ ततो यजमान
पीठादौ

लि

आचम्य अस्याः सपरिवारशिवमूर्तेः जातकर्म करिष्ये॥ यथावातः पुष्करिणीं
मिं कुशोदकेन देवस्योत्पत्तिस्थानं संप्रोक्ष्य॥ आपज्योतिपातम इत्यनेन शैवा
लमलादिक्षालनं। ततो विषममानेन मधुसर्पिषी मिश्रीकृत्य शिलातले निक्षि
प्य सुवर्णेनावघृष्य स्वर्णादिभाजनेनिधाय तत्सात्रं वामहस्ते धृत्वा दक्षिण
हस्तेन स्वर्णशलाकया तन्मधु देवस्य मुखे दद्यात्॥ प्रतेदधामि मधुनो घृतस्य
वेदं सवित्रा प्रसूतिं मघोनाम्॥ आयुष्मान् गुप्तो देवताभिः शतं जीव शरदो लोके अ
स्मिन्॥ तद्धिरण्यं प्रक्षाल्य। देवस्य दक्षिणवामकर्णयोर्निधाय। मेधां ते देवः सवि
ता मेधां देवी सरस्वती। मेधां ते अश्विनौ देवावाधत्तां पुष्करस्रजौ॥ ततो देवस्य
अंसावभिमृशेत्॥ अश्माभव परशुर्भव हिरण्यमस्तृतं भव। वेदो वै पुत्रनामासि

सुजीवशरदःशतं ॥ ततो देवस्य मुखे जलं दद्यात् ॥ इमं कुमारो जरां धयतु दीर्घमायुः शजीवसे ॥ अस्मैस्त नो प्रयुंजाना आयुर्वर्चो यशो बलं ॥ प्रभृतं घृतमादाय सर्वांगेषु देवमुद्वर्तयेत् ॥ सुगंधद्रव्यैर्देवमुद्वर्त्य कनिक्रदज्जनुषं ॥ ततो वस्त्रेण जलं परिमार्ज्य पंचोपचारैः संपूज्य दीपैर्नीराजयेत् ॥ ततो बहिर्जलचरेभ्यो बलिं दद्यात् ॥ गृण्हंतु पार्षदाः सर्वे शिवस्यानुचराः सदा ॥ मातरः प्रमथाद्याश्च बलिमोदनमुत्तमं ॥१॥ देवं प्रार्थयेत् ॥ हिरण्मयांडं प्रबभूव यस्मात् स एक आसीद्भुवनाधिपत्ये ॥ भूमिं तथा द्यां च दधार तस्मै देवाय कस्मै हविषा विधेम ॥१॥ स्वागतं देवदेवेश विश्वरूप नमोस्तु ते सर्वं च तत् दधिष्ठानं मधुपं कूर्मः सहस्वतत् ॥ इति प्रार्थ्य उत्तिष्ठेति देवमुत्थाप्य गीतवाद्यादिसुवासिनी हस्तस्थ कलशाम्रपत्तः रथादिवाहनेन कूर्मशिला प्र प्राशिलासहितं देवं नयेत् ॥ मध्यमार्गे बलिः ॥ ९

अर्धमार्गे स्वल्पां भूमिं निखनेत् ॥ तत्र इंद्रादिलोकपालेभ्यो नम इति गंधादिभिः संपूज्य ततः क्षेत्रपालं पूजयेत् ॥ आवाहयामि देवेशं भैरवं क्षेत्रपालिनं ॥ दिव्यदीप्तिं महाकायं नानाभरणभूषितं ॥ ॐ भूर्भुवः स्वः क्षेत्रपाल इहागच्छ क्षेत्रस्यप० गंधपुष्पाक्षतयुतं माषभक्तकुंकुमाक्तं बलिं हस्ते गृहीत्वा प्रार्थयेत् ॥ ॐ नमो भगवते क्षेत्रपाल भासुरत्रिनेत्र ज्वालामुख चतुःषष्टिरूपाय नगरग्राम क्षेत्र वन व्यापिने सकलजगत्स्तुतिलाय ॐ क्रां क्रीं क्रूं क्षेत्रपाल बलिं गृण्ह गृण्ह भैरवरूप कुरु २ क्रूं क्रूं फ्रां फ्रां फ्रां क्रीं डमरु डमरु कुरु कुरु यमदंड हस्त छिंधि २ भिंधि २ कुरु २ मुरु २ चल २ कूं २ रूपादिकलि २ किलि तं पातु नः बलिं गृहाण हिंकाराय स्वाहा । भो क्षेत्रपाल बलिं गृहाण २ विघ्नानि वारय २ स्वाहा ॥ इति बलिं दत्वा ॥ पुष्पांजलिं क्षिपेत् नमस्येत् ॥

हनुम

ततो हस्तौ पादौ प्रक्षाल्याचम्य ॥ ब्राह्मणैः सुहृद्भिः सह मंडपं प्रदक्षिणीकृत्य स्नानमंड स
पे देवं स्थापयित्वा ॥ गंधादिभिः संपूज्य इति जलयात्रा ॥ ततः वास्तुपूजनं ॥ ततः
मंडपवेद्यां सर्वतोभद्रं लिंगतोभद्रं वा विलिख्य तत्र मंडलदेवता आवाह्य पूजयेत् ॥
ततः अग्निप्रतिष्ठां कृत्वा ग्रहान् संपूज्यान्वाधानं कुर्यात् ॥ करिष्यमाणसपरिवा
रशिवप्रतिष्ठाकर्मणि होमं कर्तुमन्वाधानं करिष्ये समिद्द्वयं चर्वाज्याहुतयः अस्मिन्नग्नौ
सादि चक्षुषी आज्येनेत्यन्तमुक्त्वा प्रधानं ॥ आदित्यादिनवग्रहान् अर्कादिस
मित्तिलचर्वाज्यद्रव्यैः प्रतिद्रव्यं प्रत्येकं यथासंख्याकाभिराहुतिभिः ॥ ग्रहाधि
देवताप्रत्यधिदेवतानि तैरेव द्रव्यैः प्रतिद्रव्यं प्रत्येकं ग्रहापेक्षयान्यूनसंख्याभिः ।
विनायकादिकर्मसाद्गुण्यदेवताः तै० कं ततोपिन्यूनसंख्याभिः । इंद्रादिक्रतुसंरक्ष
कदेवताः तै० कं ततोपिन्यूनसंख्याभिस्तासमाभिर्वा ॥ शिख्यादिवास्तुमंडल
देवताः समिदाज्यपायसयवतिलैः प्रतिद्रव्यं प्रत्येकं अष्टपरेकावरान्यत
मसंख्याकाभिः ॥ वास्तोष्पतिं तैरेव द्रव्यैः प्र० कं अष्टशतपराष्टावरान्यतमसं
ख्याभिः पुनः वास्तोष्पतिं चतुर्वारं चरुणा पुनः वास्तोष्पतिं पंचविंशतिभिः
पंचभिर्वा बिल्वफलैस्ताम्बूलैर्वा सर्वतोभद्रदेवताः एकैकयाज्याहुत्या ॥ पुनरत्र
प्रधानं स्थाप्यदेवं शिवं यालरषुः शिवतमा द्रापेअंधसस्पते सहस्राणीत्य
नुवाकत्रयगतमंत्रैः संख्याभिः प्रतिपर्यायं मांज्याहुतिभिः ॥ दुर्गाद्यता प्रत्येक
कतिलैः प्रतिपर्यायमष्टसंख्याकाभिराहुतिभिः ॥ तत्परिवारान् गौरीगणेशान्
नंदी वासुकीन् प्रतिपर्यायं प्रत्येकमष्टाष्टसंख्याकाभिर्घृताक्ततिलाहुतिभिः

सम

भवादिदेवताः तिलोदन गुडोदन हरिद्रोदनैस्त्रिभिर्मिलित द्रव्येण नव

हनुमंतं प्रति पर्यायं अष्टसंख्याभिर्घृताक्तलिकाहुतिभिः शेषेण साहिः आज्य

भागांतं कृत्वा द्रव्यत्यागं कुर्यात् ॥ ततो यष्टवास्तु सर्वतोभद्रदेवतानां होमं कु

र्यात् ॥ ततो यजमानः स्नान मंडपं गच्छेत् ॥ आचम्य अस्यां सपरिवारशिव

मूर्तौ स्नानविधिं नेत्रोन्मीलनादि संस्कारं च करिष्ये ॥ तत्र पंचगव्येन भूमिं

वेदिकां च संप्रोक्ष्य ॥ प्रथमवेष्टांगदलैः स्वस्तिकमालिख्य । तत्र सप्तधा

न्यं निक्षिप्य तत्र भद्रपीठं श्रीपर्ण्योदुंबरादिकृतं निधाय तत्र प्रागग्रान्कु

शानास्तीर्य प्रतिमां प्राङ्मुखीं निवेशयेत् प्रतिमां देवतां ॥ ततो कलशवि

धिना कलशान् संस्थाप्य जलैः पूरयित्वा गंधाक्षतपुष्पैः संपूज्य देवं प्रार्थये

त् ॥ स्वागतं देव देवेश विश्वरूप नमोस्तु ते ॥ शुद्धेपि त्वदधिष्ठाने शुद्धिं कुर्मः

हनुमन्मूर्तौ च अग्न्युत्तारणपूर्वकं ८

प्रतिष्ठा ९

सहस्व तां ॥ इति प्रार्थ्य स्नपयेत् ॥ अग्निर्मूर्धेति मृदा कलशेन १ गायत्र्या गोमूत्रक

लशेन २ गंधद्वारामिति गोमयेन ३ मानस्तोकेति भस्मना ४ तत्सवितुरिति गंधोद

केन ५ पंचकलशैः शुद्धोदकेन ॥ नमः शंभवे चेति प्रथमेन १ हंसः शुचिषद्द्वितीयेन २

यातेरुद्रेति तृतीयेन ३ विष्णोरराटमिति चतुर्थेन ४ ब्रह्मजज्ञानमिति पंचमे

न ५ घृतं मिमिक्षे इति घृतेनाभ्यज्य द्रुपदादिवेति उष्णोदकेन संस्नाप्य गंधादिध

पांतं संपूज्य । परमान्नं निवेद्य वस्त्रेणाच्छाद्य ॥ कुंकुमाक्तेन सूत्रेणावेष्ट्य द्विती

यवेद्यां नीत्वा गंधादिना संपूज्य दीपैर्निराज्य नेत्रोन्मीलनं कुर्यात् ॥ तैजस

पात्रे घृतयुतं मधु गृहीत्वा सुवर्णशलाकया नेत्रोन्मीलनं कुर्यात् तत्रादौ ब

हिः प्रदर्श्य आचार्यस्तन्मधु सुवर्णशलाकया गृहीत्वा स्वयं पार्श्वे स्थित्वा सत्

र्यं घोषं चित्रं देवानामिति मंत्रेणैकैकं नेत्रमुन्मीलयेत् ॥ तदानवृष्टिं सुरत
स्तिष्ठेत् ॥ ॐ नमो भगवते रुद्राय हिरण्यरेतसे परात्पराय परमात्मने विश्वरूपा
यो माप्रियाय नम इति संलिख्य ॥ ॐ जातिरेति मधु अंजनं ॥ इदं न बाण लिंगे आ
चार्याय धेनुं दद्यात् ॥ इदं गोप्रतिनिधिभूतं द्रव्यं नेत्रोन्मीलन सांगता येतत्सं
पूर्ण फल प्राप्तये श्री सपरिवार शिव प्रीत्यर्थं तुभ्यमहं संप्रददे न मम ॥ शिल्पि
ने वस्त्रादि दद्यात् ॥ इति नेत्रोन्मीलनं ॥ ततो देवस्य हस्ते सितोर्णा निर्मितं स
र्वौषधि समन्वितं कार्पास वासितं कौतुकसूत्रं कनिष्ठ दद्यादिति बध्नीयात् ॥ स
र्वसत्वमयं शांतं परब्रह्म सनातनं ॥ त्वामेवाहं करिष्यामि त्वं वस्यो भव ते नमः ॥
इत्यनेन कंकणं बध्वा ॥ यजमान आचम्य अस्यां मूर्तौ देवताधिष्ठान सिध्यर्थं

हनुम

नानाद्रव्य पूरितानेक कलशैरर्चां शुद्धि स्नपनं करिष्ये ॥ तृतीय वेद्यां देवं नीत्वा वेदी
द्वय पक्षे द्वितीय वेद्यां समग्र स्नान विधिः ॥ गंधादिभिः संपूज्य प्रार्थयेत् ॥ नमस्ते ऽर्च्ये
सुरेशानि प्रकृते विश्वकर्मणः ॥ प्रभाविताशेष जगद्धात्रि तुभ्यं नमो नमः ॥ त्वयि सं
पूजयामीशं सदाशिवमनामयं ॥ रहिताशेष दोषैस्त्वं सांनिध्ये युक्ता सदा भव ॥ ॥ सप्र

व
लश

णव्याहृत्या गायत्र्या शुद्धोदकैः स्नानं ॥ या ओषधीरिति व्रीहि तोय घटेन ॥ शुक्रमसी
ति गो घृतेन ॥ द्रुपदादिवेति माषसुर पिष्टेनोद्वर्तनं ॥ तत्तैव शुद्धांबु घट स्नानं ॥ या
ॐ षधीरिति सर्वौषधि जलेन ॥ गायत्र्या द्वादश पल गोमूत्र कुंभेन ॥ गंधद्वारा
मिति सप्त पल गोमय कुंभेन ॥ आप्यायस्वेति षोडश पल क्षीर कुंभेन ॥ दधिक्रा
व्ण इति विंशति पल दधि कुंभेन ॥ घृतवतीति सप्त पल घृत कुं ॥ देवस्य त्वेति शु
द्धोदक कलशेन ॥ मधुवाता इति त्रिपल मधु कुं ॥ आयं गौरिति त्रि पल शर्करा कुं ॥

हिरण्यवर्णामि हिरण्योदकं कुं॰ तरत्समंदीति कुशोदकं कुं॰ द्रुपदादिवेतियव
गोधूम शालि बिल्व मसूर चूर्णेनोद्वर्त्य यालेरुद्रः शिवातनूरिति यक्षकर्दमेन ॥१६
यक्षकर्दमस्तु कस्तूरिकाया द्वौ भागौ द्वौ भागौ कुंकुमस्य च । चंदनस्य त्रयो भागाः
शशिनस्त्वेक एव हि सुस्नः । जटामांस्यामलं सुगंधैरनुलिप्य ॥ मानस्तोकेतिउष्णो
दकं क॰ १७ गंधद्वारामिति गंधोदकेन १८ अश्वत्थेवेति पंचपल्लवकषायोदकेन १९ याः फ
लिनीरिति फलकं॰ २० हिरण्यगर्भ इति रत्नोदकं॰ २१ इमं मे गंगे गंगोदकं॰ २२ समु
द्राद्ऊर्मिरिति गर्भोदकेन २३ त्वातारमि॰ कदंबपल्लवकं॰ २४ त्वं नो अग्ने॰ शाल्मली
कं॰ २५ समायसो॰ जंबूपल्लवकं॰ २६ मो षु णः पु॰ अशोकप॰ तत्त्वायामि॰ प्लक्ष
प॰ २७ तव वायव॰ आम्रप॰ सोमो धे॰ वटप॰ तमीशा॰ बिल्वप॰ ३० नमोस्तु
स॰ नागपल्ल॰ अश्वत्थ॰ अस्तप॰ ३३ त्र्यंबकं॰ रुद्राक्षकं ३३ आपो हि ष्ठा शुद्धोद॰ ३४

१०

हिरण्यवर्णा ऋ॰ यासां राजा ॥ यासां देवा॰ शिवेनमा॰ पवमानः सुवर्जन॰ पुना
तु इत्येतेन शुद्धोदकं॰ गंधाद्युपचारैः संपूज्य तद्विष्णोरिति द्वाभ्यां स्तुत्वा ए
हि हि भगवन् शंभो लोकानुग्रहकारक । यज्ञभागं गृहाणेमं सदाशिव न
मोस्तु ते ॥ इति स्नपनविधिः ॥ ततः उत्तिष्ठ ब्र॰ देवमुत्थाप्य वेद्यां पूर्वमुखं देवं
शाययेत् । वेद्यां कुशानास्तीर्य शय्यायां पुष्पाणि प्रक्षिप्य नमः शंभवे चेति शय्या
यां देवं निधाय ॥ तत्र प्रागादिक्रमेण भवं १ शर्वं २ ईशानं ३ पशुपतिं ४ उग्रं ५
रुद्रं ६ भीमं ७ महांतं ८ पूजयेत् वस्त्रेणाच्छाद्य देवस्य शिरोदेशे भस्मोनिद्राक
लशं संस्थाप्य तत्र निद्राप्रतिमामावाहयेत् ॥ ततो भस्मतिलदर्भैः देवस्य प
रितः रक्षार्थं प्राकारत्रयं कृत्वा ततः देवे न्यासं कुर्यात् ॥ ॐ अं नमः पादयोः

ॐ अं नमः हृदये। मं नमः ललाटे। इति प्रणवन्यासः। भूः पादयोः। भुवः हृदि। स्वः ल
लाटे। इति व्याहृतिन्यासः। अं शिरसि। आं मुखे। इं दक्षनेत्रे। ईं वामनेत्रे। उं दक्षक
र्णे। ऊं वामकर्णे। ऋं दक्षनासापुटे। ॠं वाम०। लृं दक्षकपोले। ॡं वा०। एं ऊर्ध्वोष्ठे। ऐं अ०
ओं ऊर्ध्वदंतपंक्तौ। औं अधोद०। अं जिकायां। अः कंठे। कं दक्षबाहुमूले। खं दक्ष
कूर्परे। गं दक्षमणिबंधे। घं दक्षकरांगुलिमूले। ङं दक्षकरांगुल्यग्रे। चं वाम
बाहुमूले। छं वामकूर्परे। जं वाममणिबंधे। झं वामकरांगुलिमूले। ञं वामकरां
गुल्यग्रे। टं दक्षपादमूले। ठं दक्षजानुनि। डं दक्षपादगुल्फे। ढं दक्षपादां
गुलिमूले। णं दक्षपादांगुल्यग्रे। तं वामपादमूले। थं वामजानुनि। दं वामपादगु
ल्फे। धं वामपादांगुलिमूले। नं वामपादांगुल्यग्रे। पं दक्षिणकुक्षौ। फं वा०। बं पृ
ष्ठे। भं नाभौ। मं उदरे। यं हृदि। रं आधारे। लं मणिपूरे। वं स्कंधयोः। शं हृदादि द

११

क्षकरे। षं हृदादि वामकरे। सं हृदादि दक्षपादे। हं हृदादि वामपादे। ळं क्षं सर्वां
गे। इति मातृकान्यासः। अं हृदयाय नमः। [illegible] सं शिरसे स्वाहा। दां शिखायै वषट्।
त्रिं कवचाय हुं। वां नेत्रत्रयाय वौषट्। [illegible] अस्त्राय फट्॥ ततः कुंडसमीपे सं
पातधारणार्थं एकं कलशं विधिना संस्थाप्य पर्याय होमं कुर्यात्॥ अन्वा
धानोक्तक्रमेण प्रधानाज्याहुतीर्हुत्वा॥ सर्वो वै रुद्र इति दक्षपादौ स्पृशेत्॥
एवं पुनर्हुत्वा कद्रुद्राय इति मध्यं स्पृशेत्॥ एवं पुनर्हुत्वा नमो हिरण्यबाहवे इति
शिरः स्पृशेत्॥ पुनः हुत्वा संपूर्णेन रुद्रेण सर्वांगं स्पृशेत्॥ प्रतिस्पर्शं संपात
कलशोदकेनाभिषिंचेत्॥ पंचोपचारपूजां च॥ ततः उदुत्सं जातवेदसमिति
देवमुत्थाप्य सद्योजातादिपंचमंत्रैः देवालयं प्रवेश्य। गर्तमध्ये पंचरत्नानि
निक्षिपेत्॥ अस्तिशिला कूर्मशिलाः स्थापयित्वा नमस्ते रुद्रमन्यव इति देवं स्था

पयित्वा भुवाद्योरिति स्थिरीकृत्य देवं स्पृष्ट्वा ॐ भूः पुरुषमावाहयामि ॐ भुवः पु० ॥
ॐ स्वः पु० ॥ इहैवैधीति मंत्रान् जपित्वा ॥ प्रणवेन कृतांगन्यासः प्राणप्रतिष्ठां
कुर्यात् ॥ अस्यै प्राणाः प्रतिष्ठंतु । अस्यै प्राणाः क्षरंतु च । अस्यै देवत्वमर्चायै
मामहेति च कश्चन ॥१॥ देवकर्णे गायत्रीं जपेत् ॥ स्वागतं देवदेवेश मद्भा-
ग्यात्त्वमिहागतः । सान्निध्यं सर्वदा देव स्वार्चायां परिकल्पय ॥१॥ इति प्रार्थ्य र
त्नांबुकलशोदकेनाभिषिंचेत् ॥ ततो देवताध्यानं ॥ आवाहनं । आसनं ॥ वि
ष्णुक्रांता श्यामाक पद्मपत्रयुत कलशोदकैः पाद्यं ॥ क्षीर कुशाग्र यव तिल दूर्वा
युत कलशोदकेनार्घ्यं ॥ एला लवंग कर्पूर कंकोल मिश्रोदकेनाचमनं ॥ पंचामृत
मंत्रैः पंचामृतस्नानं पंचोपचारपूजा च अभिषेकः गंधादि पुष्पांतं कल्पितं पूजये
त् ॥ इमा आपः शिवाः शिवतमा पूताः पूततमा मेध्या मेध्यतमा अमृता अमृत

रसाः पाद्यार्थास्ता जुषतां प्रतिगृह्णातु भगवान् महादेवः ॥ स्नानपर्यंतं अस्य
मंत्रस्यावृत्तिः ॥ इमे गंधाः शुभा दिव्याः सर्वगंधैरलंकृताः । पूता ब्रह्मपवि
त्रेण पूताः सूर्यस्य रश्मिभिः ॥ गंधदाने मंत्रः ॥ इमे माल्याः शुभा दिव्याः सर्व
माल्यैरलंकृताः । पूता० पुष्पदाने मंत्रः ॥ नमो अस्तु नीलग्रीवायेति प्रतिसरं
विसृजस्य ॥ प्रार्थयेत् ॥ त्वामेकमाद्यं पुरुषं पुराणं रुद्रं शिवं विश्वसृजं प्रजानां
त्वमेव यज्ञो विहितो विधेयस्त्वमात्मनात्मन् प्रतिगृह्णीष्व भगवन् ॥ विश्व
भुजे नमः । सर्वभुजे० अंतरात्मने० परमात्मने० इति नत्वा ॥ यावच्चंद्रावनी
सूर्यास्तिष्ठंत्यप्रतिघातिनः ॥ तावत्त्वयात्र देवेश स्थेयं भक्तानुकंपया ॥
कर्तुर्नाम्ना अमुकेश्वर इति नाम दत्वा गंधादिभिः संपूज्य साष्टांगं प्रणमेत् ॥

ततः कुंडसमीपे गत्वा ॥ तिलौदनं जुहुयात् ॥ ॐ भवाय देवाय नमः स्वाहा १
शर्वाय दे० २ ईशानाय दे० ३ पशुपतये दे० ४ उग्राय दे० ५ रुद्राय दे० ६ भीमा
य दे० ७ महते दे० ८ ततः गुडौदनं जुहुयात् ॥ ॐ भवस्य देवस्य पत्न्यै नमः स्वा
हा १ शर्वस्य देवस्य प० २ ईशानस्य देवस्य प० ३ पशुपतेर्देवस्य प० ४ उग्रस्य दे
वस्य प० ५ रुद्रस्य देवस्य प० ६ भीमस्य देवस्य प० ७ महतो देवस्य प० ८ ततः हरिद्रौद
नं हुत्वा ॥ ॐ भवस्य देवस्य सुताय नमः स्वाहा ॥ १ शर्वस्य० ईशानस्य० ३ पशुपते
र्दे० ४ उग्रस्य दे० ५ रुद्रस्य दे० ६ भीमस्य दे० ७ महतो दे० ८ ततः त्रीणि हवींषि
एकीकृत्य प्रतिमंत्रमेकैकाहुतिं जुहुयात् ॥ त्र्यंबकं य० १ मानोमहांतं० २ मा
नस्तोके० ३ आरात्तेगोघ्न० ४ विकिरिद्रवि० ५ सहस्राणि सहस्रधा० ६ तलो[illegible]द
राणामभिस्नास्ये वृतोभ० ॥ ॐ शिवाय नमः स्वाहा १ शंकराय० २ सहमानाय

१३

हनुम

य० ३ शितिकंठाय० ४ कपर्दिने० ५ ताम्राय० ६ अरुणाय० ७ अपगुरमाणाय० ८
हिरण्यबाहवे० ९ सस्पिंजराय० १० बभ्लुशाय० ११ हिरण्याय १२ इति हुत्वा ॥ स्वि
ष्टकृदादिहोमशेषं समाप्य बलिदानं पूर्णाहुतिं कृत्वा ॥ कृतस्य सपरिवार
शिवप्रतिष्ठाकर्मणः सांगतायै तत्संपूर्णफलावाप्तये आचार्यादि ऋत्विग्भ्यः
श्रेयोग्रहणं करिष्ये ॥ आचार्यः यजमानकुले दीर्घमायुरस्तु इति वा आपः सं
तु सौमनस्यमस्तु अक्षतं चारिष्टं चास्तु गंधाः पांतु सुमंगल्यं चास्तु अक्षताः
पांतु आयुष्यमस्तु ॥ पुष्पाणि पांतु सौश्रियमस्तु ॥ भवन्नियुक्तेन मया भ
वत्कृतमनोरथसिध्यर्थं अस्मिन् सपरिवारशिवप्रतिष्ठाकर्मणि ये भिर्ब्रा
ह्मणैः सह यत्कृतं आचार्यत्वं ब्रह्मत्वं सदस्यत्वं जपकर्तृत्वं होमकर्तृत्वं च

उपद्रष्टृत्वं गणपति० त्वं १

हनुम

तदुत्सन्नं यच्छ्रेयस्तत्तुभ्यमहं संप्रददे न मम ।। प्रतिगृह्णातु भवान् प्रतिगृह्णामी
ति यजमानः । तदंगत्वेन ऋत्विक्पूजनं करिष्ये तथा दक्षिणादानं । ततश्चां
गतागोदानं ।। कृतस्यास्य सपरिवारशिवप्रतिष्ठाकर्मणः सांगतायै तत्संपूर्णफ
लावाप्तये श्रीशिवादिदेवताप्रीत्यर्थं आचार्याय द्रव्यद्वारा गोदानं करिष्ये ।
ब्राह्मणं संपूज्य गवामंगे प्रतिष्ठंति भुवनानि चतुर्दश । यस्मात्तस्माच्छिवं मे
स्यादिह लोके परत्र च ।। इदं गो प्रतिनिधिभूतं यथाशक्ति द्रव्यं पूर्वोक्तफल
सिद्धये अमुकशर्मणे तुभ्यमहं संप्रददे न मम । ।यज्ञसाधनभूता या विश्व
स्याघौघनाशिनी । विश्वरूपधरो देवः प्रीयतामनया गवा ।। मयाकृत
स्य देशकालाद्यनुसारतः सपरिवारशिवप्रतिष्ठाकर्मणः सांगतायै श्रीशिवादि
देवताप्रीत्यर्थं यथाशक्ति ब्राह्मणान् सुवासिनीश्च यथोपपन्नेनान्नेन भोज

यिष्ये ।। नानानामगोत्रेभ्यो ब्राह्मणेभ्यो भूयसीं दक्षिणां दातुमहमुत्सृ
जे ।। स्वस्ति ।। अनेन मया कृतेन देशकालाद्यनुसारतः सपरिवा

रशिवप्रतिष्ठाकर्मणा श्रीसपरिवारः शिवः प्रीयतां ।। इदं प्रधानपीठं ग्र
हपीठं च सदक्षिणाकं आचार्याय तुभ्यमहं संप्रददे न मम ।। पुत्रकं पूजयेत्तू ।
कलशेभ्यः उदकं गृहीत्वा ।। यजमानाभिषेकं कुर्यात् ।। ब्राह्मणेभ्य आ
शिषं गृहीत्वा ।। सुहृद्युतो भुंजीत ।। इति शिवप्रतिष्ठाविधिः ।। छ ।। छ ।।
देवता नाम मंत्रोच्चार प्रमाणं ।। गारुडे ।। प्रणवादिनमोंतं च चतुर्थ्यंतं च सत्तम ।
देवतायाः स्वकं नाम मूलमंत्रः प्रकीर्तितः ।। १ ।। इदं वतरापोक्तं भवेत् ।

सत्स्वा॰४ धान्यस्वा॰ यस्वा १ महेस्वा॰८ शीहिस्वा॰२

अथ पर्यायहोमः ॥ यातेरुद्रःशिवतमा १ यातेरुद्रशिवातनूर॰२ यामिषुं
स्वा॰३ गिरिशं॰३ शिवेनवच॰४ अध्यवोचद॰५ असौयस्ताम्रो॰६ असौयोवसं॰७ तिन॰स्वा॰७
~~[illegible]~~ अथोयेअस्य॰९ याम्ब्यते ह॰१० निशीर्यश॰११ अनेशान्न
से॰१२ तयास्मान्विश्व॰१३ उभाभ्यामु॰१४ अथोयद॰१५ ॥ द्रापेअंध॰१
यातेरुद्रशिवातनूः शिवाविं॰२ इमारुद्रायतवसे॰३ मृडानोरुद्रो॰४ मानो
महांतं॰५ मानस्तोके॰६ आरात्तेगो॰७ स्तुहिश्रुतंगे॰८ परिणोरुद्रस्य॰१०
मीढुष्टम॰११ विकिरिद॰१२ सहस्राणि॰१३ ॥ सहस्राणिसह॰१ असि
न्म॰२ नीलग्रीवाः॰३ नीलग्रीवाःशितिकंठादि॰४ येवृक्षे॰५ येभूतानां॰६
येअन्नेषु॰७ येपथां॰८ येतीर्थानि॰९ येवनानां॰१० येयाम्या॰११ यएता॰१२
तामग्निवर्णां तपसा ज्वलंतीं वैरोचनीं कर्मफलेषु जुष्टां ॥ दुर्गांदेवींशर

णमहंप्रपद्ये सुतरसि तरसे नमः सुतरसि तरसे नमः स्वाहा १ गौरीर्मि
मायसलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी । अष्टापदी नवप
दी बभूवुषी सहस्राक्षरा परमे व्योमन् स्वाहा ॥२ गणानां त्वा गणपतिं ह
वामहे कविं कवीनामुपमश्रवस्तमं ॥ ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ
नः शृण्वन्नूतिभिः सीद सादनं स्वाहा ३ आयं गौः पृश्निरक्रमीदसदन्
मातरं पुरः । पितरं च प्रयन्त्स्वः स्वाहा ४ ऋषभं मा समानानां सपत्नानां वि
षासहिं ॥ हंतारं शत्रूणां कृधि विराजं गोपतिं गवां स्वाहा ५ अस्मे रुद्रा मे
हना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः । यः शंसते स्तुवते धायि पज्र
इंद्रज्येष्ठा अस्माँ अवंतु देवाः स्वाहा ॥ इति रुद्रदेवस्य पादो साङ्गो रुद्रसर्व

उदीर्ष्वातः पतिवती ह्ये३षा विश्वावसुं नमसा गीर्भिरीळे ॥ अन्यामिच्छ पितृष
दं व्यक्तां स ते भागो जनुषा तस्य विद्धि ॥१॥ यत्ते सुशीमे हृदये हितमंतः प्रजाप
तौ ॥ मन्ये हं मां तद्विद्वांसं माहं पौत्रमघं नियां ॥१॥ बळित्था पर्वतानां खिद्रं बि
भर्षि पृथिवी ॥ प्र या भूमिं प्रवत्वति मन्हा जिनोषि महिनी ॥१॥ अंजंति त्वाम
ध्वरे देवयंतो वनस्पते मधुना दैव्येन ॥ यदूर्ध्वस्तिष्ठा द्रविणेह धत्ताद्यद्वा क्ष
यो मातुरस्या उपस्थे ॥१॥ हिरण्यवर्णाः शुचयः पावकाः यासु जातः कश्यपो
यास्विंद्रः ॥ अग्निं या गर्भं दधिरे विरूपास्तान आपः शं स्योना भवंतु ॥
यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यं जनानां ॥ मधुश्चु

तः शुचयो याः पावकास्ता ॥ यासां देवा दिवि कृण्वंति भक्षं या अंतरिक्षे बहु
धा भवंति ॥ याः पृथिवीं पयसोंदंति शुक्रास्ता ॥ शिवेन मा चक्षुषा पश्यतापः
शिवया तनुवोपस्पृशत त्वचं मे ॥ सर्वाँ अग्नीँ रप्सुषदो हुवे वो मयि वर्चो ब
लमोजो निधत्त ॥ पवमानः सुवर्जनः ॥ पवित्रेण विचर्षणिः ॥ यः पोता स पु
नातु मा ॥ पुनंतु मा देवजनाः पुनंतु मनवो धिया पुनंतु विश्व आयवः ॥ जा
तवेदः पवित्रवत् ॥ पवित्रेण पुनाहि मा ॥ शुक्रेण देव दीद्यत् ॥ अग्ने क्रत्वा क्रतूँ
रनु ॥ यत्ते पवित्रमर्चिषि ॥ अग्ने विततमंतरा ॥ ब्रह्म तेन पुनीमहे ॥ उभा
भ्यां देव सवितः ॥ पवित्रेण सवेन च ॥ इदं ब्रह्म पुनीमहे ॥ वैश्वदेवी पुनती देव्यागा
त् ॥ यस्यै बह्वीस्तनुवो वीतपृष्ठाः ॥ तया मदंतः सधमाद्येषु ॥ वयं स्याम

पतयो रयीणां। वैश्वानरो रश्मिभिर्मा पुनातु। वातः प्राणेनेषिरो मयोभूः। द्यावापृथिवी पयसा पयोभिः। ऋतावरी यज्ञिये मा पुनीतां। बृहद्भिः सवितस्तृभिः। वर्षिष्ठैर्देव मन्मभिः। अग्ने दक्षैः पुनाहि मा। येन देवा अपुनत। येनापो दिव्यंकशः। तेन दिव्येन ब्रह्मणा। इदं ब्रह्म पुनीमहे। यः पावमानीरध्येति। ऋषिभिः संभृतं रसं। सर्वं स पूतमश्नाति। स्वदितं मातरिश्वना। पावमानीर्यो अध्येति॥ ऋषिभिः संभृतं रसं। तस्मै सरस्वती दुहे। क्षीरं सर्पिर्मधूदकं। पावमानीः स्वस्त्ययनीः। सुदुघा हि पयस्वतीः। ऋषिभिः संभृतो रसः। ब्राह्मणेष्वमृतं हितं। पावमानीर्दिशंतु नः। इमं लोकमथो अमुं। कामान्समर्धयंतु नः। देवीर्देवैः समाभृताः। पावमानीः स्वस्त्ययनीः। सुदुघा हि घृतश्चुतः। ऋषिभिः संभृतो रसः। ब्राह्मणेष्वमृतं हितं। येन देवाः पवित्रेण। आत्मानं पुनते सदा। तेन सहस्रधारेण। पावमान्यः पुनंतु मा। प्राजापत्यं पवित्रं। शतोद्यामं हिरण्मयं। तेन ब्रह्मविदो वयं। पूतं ब्रह्म पुनीमहे। इंद्रः सुनीती सह मा पुनातु। सोमः स्वस्त्या वरुणः समीच्या। यमो राजा प्रमृणाभिः पुनातु मा। जातवेदा मोर्जयंत्या पुनातु। ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे। ध्रुवं विश्वमिदं जगत् ध्रुवो राजा विशामयं। ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः। ध्रुवं त इंद्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवं। ध्रुवं ध्रुवेण हविषाभि सोमं मृशामसि। अथो त इंद्रः केवलीर्विशो बलिहृतस्करत्। इहैवैधि माप च्योष्ठाः पर्वत इवाविचाचलिः। इंद्र इवेह ध्रुवस्तिष्ठेह राष्ट्रमु धारय। इममिंद्रो अदी

धरध्रुवं ध्रुवेण हविषा । तस्मै सोमो अधि ब्रवत्तस्मा उ ब्रह्मणस्पतिः ॥ ११ ॥
उत्तिष्ठ ब्रह्मणस्पते देवयंतस्त्वेमहे । उप प्रयंतु मरुतः सुदानव इंद्र प्राशू
र्भवा सचा ॥ तदस्तु मित्रावरुणा तदग्ने शंयोरस्मभ्यमिदमस्तु शस्तं ॥
अशीमहि गाधमुत प्रतिष्ठां नमो दिवे बृहते सादनाय ॥ म्हावे प्रीति ॰
तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥ १ महादेवस्य । गणांबिकायै विद्महे काम
कालिन्यै धीमहि ॥ तन्नो गौरी प्रचोदयात् ॥ २ इति गौर्याः । तत्पुरुषाय विद्महे वक्रतुंडाय धीमहि । तन्नो
दंतिः प्रचोदयात् । ३ इति गणपतेः । तत्पुरुषाय विद्महे सहस्रफणाय धीमहि । तन्नः शेषः प्रचोद
यात् ४ इति नागस्य । तीक्ष्णशृंगाय विद्महे वेदपादाय धीमहि । तन्नो वृषः प्रचोदयात् । ५ इति
वृषभस्य । तत्पुरुषाय विद्महे वायुपुत्राय धीमहि । तन्नो रुद्रः प्रचोदयात् । ६ इति हनुमतः । ७ ।

५६